Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विद्यापति कविवरें एहो गाओल जाचक जनकेगती।
हाँसिनि देइपति गरूड नरायण देवसिंह नरपती॥

सत्वर मध्यम चारि एहि, रागिनि ताल निवेक।

॥ अथाभिरामा० ॥ वृत्त लक्षणमस्याः ॥

चतुष्कल चतुष्कन्तु सैकमारभ्य यद्गताः।
कलिकाः सचतुर्मात्र षट्कल स्तृतयावधि॥
तादृशार्द्ध पदोपेता विरामचरणातु या।
अभिरामान्तु तामाहुः शार्ङ्गीङ्गीति सत्तमाः॥

॥ उदाहरणम् ॥

नमित अलकैं वेढ़ला मुख कमल सोभे
राहुक वाहु परसला शशिमण्डल लोभे॥
मदन सरें मुरुछली चिर चेतन बाला,
देखलि से धनि हे वासि मालति माला॥
कलसकुच लोटाइली घन सामरि वेनी,
कनय पवय सूतली जनि कारि नागिनी॥
भने विद्यापति भाविनी थिर थाकन मने,
राजाहुँ सिवसिंह रूपनराएन लखिमादेइरमने॥

॥ अथ शोभना ॥

कलाभिः कलिकाभ्यास्वा यत्राधिकगण द्विकात्।
षट्कलात्पदमर्द्धस्या दुत्सर्गात्सातु शोभना॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥ उदाहरणम् ॥

पुरन्द्र पुरादित अभिमत पुरू, दारिद दुःख दूरें परिहरू ।
तोहरा चरन सरन जे आव, धनवितपूत परम पद पाव ॥

[इत्यादि]

॥ अथानूपा ॥ वृत्तमस्यास्त लक्षणम् ॥

आदावर्द्धद्वयोपेतम्पदमस्मात्त्रिभिद्दलः ।
ततोऽप्येवं क्रमेणैव बहुधा पद निर्मितिः ॥
त्रयोदश कलान्ताः स्युर्यत्राङ्कावधयः कलाः ।
नियमे नोज्झिता ह्रस्व पदार्द्धेतु व्यवस्थिताः ॥
षट्कलाभ्यां सैकताभ्यामथवा सकलान्त म् ।
अनूपा मिति तामाहुः शारङ्गीङ्गोति सत्तमाः ॥

॥ उदाहरणम् ॥

तोरएमोज गेलिहुँ फूल मोनी मानिके तूल ॥
साजनि साजी अछोरसि मोरि,
गरुवि गरुवि आरतितोरि ॥
डिठि देखइतें दिवस चोरि,
एतकन्हाइ परधन लोभ ।
जेनहिलुवुधसेहे परसोभ,
निकुञ्जकेरसमाज इथिं नहोमुखलाज ॥
ढ़ाँकिवोवेन अपजस रासि,
सेकरे कान्हु जेन लजासि ।
जखने नागर नगर जासि ।
पीनपयोधर भार मदन राए भण्डार ॥
रतने जडिलोता हरिमाथ ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मलिन होए तन देहे हाथ ॥
वड़ से कठिन हमर नाथ ।
कविभन कराठहार, रस एनए के पार ॥
सिरि शिव सिंह जानए तन्त ।
रतन सन लखिमा कन्त ॥
सव कलारसँ जे गुन मन्त ।

॥ सारङ्गी भेदाः कथिताः ॥

॥एतस्यातु पाश्चात्य सूही समाख्यात रागमिलनेन सूहओ इत्यपिनाम ॥
॥ अतः परमेतद्भेदाउच्यन्ते । तत्रसूहवः ॥ एतच्छन्दो लक्षणम् ॥

सप्तविंशति पर्य्यन्तं चतुर्विंशतितः कलाः ।
यत्पदार्द्धे ध्रुवाद्यर्द्धे दशपञ्चात्मिकाः पुनः ॥
मिथिलायामयन्ताव त्सूहवस्समुदाहृतः ।

॥ उदाहरणम् ॥

पिआपरवास आसतुअ पासहिं तें किवोलह जदि आन ।
जे पतिपालक से भेल पावक इथीं कि बोलत आन ॥
ध्रु०॥ साजनि अघटन घटावह मोहि ।
पहिलहिं आनि पानि पिअतमें गहि करेंधरिसोंपलहुँतोहि ।
कुलटाभए जदि पेमवढ़ाइ अ तें जीवने की काज ।
तिलाएक रंग रभससुखपाओव रहत जनमभरि लाज ॥
कुल कामिनि भए निजपिअ विलसए अपथें कतहुनहिजाइ
की मालति मधुकर उपभोगए किम्वा लताँहि सुखाइ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विद्यापतिकहकुलर अलैरह दूति वचने नहि काज ।
राजासिवसिंह रूपनराएन लखिमादेविसमाज ॥

मध्यमत्रिकमादाय तालस्य गतिरत्रतु ॥

अयन्तु देशाख्यः ॥ अथ शुद्धः ॥ एतच्छन्दो लक्षणम् ॥

सप्तविंशतिमात्राभिर्य्यत्पदार्द्धद्वयं समम् ।
ऊनविंशतिमात्राभि र्ध्रुवकार्यर्द्धमुत्तरम् ॥
षोड़शात्मकमात्राभि र्य्येतशुद्धः स सूहवः ।

॥ उदाहरणम् ॥

सरदकससधर सममुखमण्डल कान्ने झँपावह वासे ।
अलपओ हास सुधारस वरिसओ छाडओजमिजपिआसे
॥ ध्रु० ॥ कि आरे मानिनि अपनहुँ मने जनुमान ।
रूसैत्तें जानहुँ वोलव अगेजान ।
हाटक घटन सिरीफल सुन्दर कुचयुग कोटि करु आधे ।
पानिपरस रस जनुभव सुन्दरि न कर मनोरथ वाधे ॥
नागरि अङ्ग विभङ्गक आगरि विद्यापति कवि भाने ।
राजा सिव सिंह रूपनराएन लखिमादेवि रमने ॥

अथ काम सूहवः ॥ ए० छन्दोलक्षणम् ॥

पञ्चविंशतितो यत्र त्रिंशदन्ताः कलाः किल ।
पदार्द्धे यद्ध्रुवाधर्द्धे श्चतुष्कल चतुष्ककः ॥
मिथिलायामयन्तावद्विख्यातः काम सूहवः ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥ उदाहरणम् ॥

बदन चाँद तोर नयन चकोर मोररूप अमिअ रसपावे।
अधरमधुरिफुल पिअ मधुकरतुल मधु बनु कतिखनजीवे॥
ध्रु० ॥ हे मानिनि मन तोर गढ़लपसाने ।
अपने रभसँहसि किछुओ उतरदेसि सुषेजाओ निसिअवसाने
निअमनें न गुनसि परबोल न सुनसि न छैलविरानी।
अपन अपनकजा कहेतें परमलजा अरथितआदर हानी॥
भनइ विद्यापति सुनुवरजौवति सवेलन न करिअमाने॥
राजा सिव सिंह रूपनराएन लखिमादेवि रमने।

अथ करुणा सूहवः ॥ ए० वृत्त लक्षणम् ॥

कलया कलिकाभ्यास्वा हीनैर्य्यत्र चतुष्कलैः।
चतुर्भिः पदमर्द्धन्तत्करुणासूहवाभिधम्॥

॥ उदाहरणम् ॥

कुल गुनगौरव शील सोभाओ,
सवेलए चढ़लिहु तोहरहिं नाओ।
हमे अबला कर कहब अनेक,
आइति पड़लाँ बुझि अविवेक॥
हठ तेज माधव कर मोहि पार,
(सब तहँ बड थिक पर उपकार)
हमरा भेलि आवे तोहरि आस,
से न करिअ जे हो उपहास

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तोहें पर पुरुष हमहु पर नारि ।
हृदए काँप तुअरीति विचारि,
भलमन्द जानि करिअ परिनाम ॥
जस अपजस पए रहगए ठाम,
भनइ विद्यापति तोहें गुनमान,
हाथिमहतें नर के नहिं जान ॥

सत्वरो मध्यमश्चैव तालद्वितयमत्र तु ।

अथसुन्दर सूहवः ॥ एतच्छन्दोलक्षणम् ॥

त्रिदलस्पदमत्रापि तृतीयस्पञ्च षट्कलम् ।
द्वितियुग्भ्याश्चतुर्म्मात्र गणाभ्यामथवा त्रिभिः ॥
चतुर्म्मात्रगणैरेव द्वितीयन्द्विकलाधिकात् ।
षट्कलात्मैक तच्छन्दावधिभूतकलन्दलम् ॥
आदिभूतन्तुयत्रस्यात्सतु सुन्दर सूहवः ।

॥ उदाहरणम् ॥

नावडोलाव अहीरे, जिवइतें न पाओवतीरे । खरनीरे लो ॥
खेवन लेअए मोले, हँसिहँमि कीदहु बोले । जीवडोलों लो ।
ककेहि के औलिहुँ आपे, वेढ़लहुँ मोहि बडे सापे । मोरे पापें लो ।
करितहुँ पर उपहासे, परलिहुनन्हिविधि फासे । नहिआसेलो
नबुझसि अबुझ गोआरी, भजिरहु देव मुरारी : नहिगारी लो
भवानी नाथ हेनभाने, नृपदेव जतरस जाने । नव कान्हे लो ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ स्मरसन्दीपनः कोडारः ॥ छन्दोलक्षणम् ॥

सप्तविंशतिपर्य्यन्त य्यँत्रविंशतितः कलाः ।
पदार्द्धंयद्‌ध्रुवाद्यर्द्धं षट्‌कलद्विक संख्यकाः ॥
स्मरसन्दीपनःसोऽयं कोडारस्समुदाहृतः ।

॥ उदाहरणम् ॥

सखि हे आज जायब मोहीं ।
घर गुरुजन डर न मानव वचन चूकव नहीं ॥
चाँदन आनिआनि अङ्गलेपव भूषनकए गजमोती ।
अञ्जनविहुँन लोचनयुगल धरत धवल जोती ॥
धवलवसनें तनु झपाओव गमन करव मन्दा ।
जैओ सगर गगन उगत सहसँसहसें चन्दा ॥
न हमें काहुकडीठिनिवारवि न हमँ करव ओते ।
अधिक चोरि परसओं करि अइहे सिनेहकलोते ॥
भने विद्यापति सुनह जुवति साहसैं सकल काजे ।
बुझ सिवसिंह रस रसमय सोरमदेवि समाजे ॥

अथ विियोगि कोडारः ॥ एतच्छन्दो लक्षणम् ॥

पञ्चविंशतिमारभ्य यत्रोनत्रिंशदन्तिकाः ।
पदार्द्धं कलिकाःकिञ्च ध्रुवाद्यर्द्धं तु ताः पुनः ॥
यत्राष्टादशपर्य्यन्ता वियोगिपदपूर्वकः ।
कोडारस्सतु विख्यातो मिथिलाजन संसदि ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥ उदाहरणम् ॥

साएसाए पिआकें कह विनती ।
इह ओ वसन्तरितु ओतहिगमावथु एतएक भलिनहिंरीती ।
घनमलयज रस परसें लागविस दुसह सु.नेअपिकनादे ॥
अनलवरिस ससि निन्दओनहोअनिसिएतएआओर परमादे
जेसवे विपरित सेसवे कहबक्त के पतिआएत आने ।
जखनेआओब हरि हमहिं निवेदव जओराखत पँचवा ने ॥
सुमुखि समाद समादरें समदल नसिरासाह सुरताने ॥
नसिराभूपति सोरमदेइपति कंसनराएन भाने ॥

॥ अपिच ॥

सिरिहिंमिललदेहानकुचँचाँदरेह। घामे न पिउलसुगन्धा ।
अधरमधुरिफुल देखिअताहेरि तुल धएलहिं अछ मकरन्दा ॥
ध्रु० ॥ रामा अइलि हे पिआ विसराइ ॥
पुरुषकेसरिजनि दमनलताधनि चुअइतें जा असिलाइ ।
गेलहि कएलह मानकी अवसर जानकि सिसु वालँभ तोरा
नु सएगेलिहे धन जागलपरिजन लगहि कलाओक चोरा।
भनइ विद्यापति सुनु वरजौवति इ रस केओकेओ जाने ।
राजा सिव सिंह रूपनराएन लखिमा देवि रमने ॥

अथ मोरङ्गिआ कोडारः ॥ एतच्छन्दो लक्षणम् ॥

दीर्घम्पदमतोहस्वे पदेदीर्घन्ततश्च ते ॥
ततोऽप्येवं क्रमेणैव पदानां निर्म्मितिर्भवेत् ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सप्तविंशति पर्य्यन्त स्पञ्चविंशतितः कला: ॥
दीर्घार्थैकलिकान्यूनै श्चतुर्भिस्तैःकलाधिकैः ॥
तै र्वा यत्नचतुर्न्नीत गणौर्हस्वार्द्धं निर्म्मितिः ॥
मोरङ्गदेश कोडारः कथ्यतेगीतिर्विस्तु सः ॥

॥ उदाहरणम् ॥

रितुराज आज विराज हे सखि नागरी गन वन्दिते
नवरङ्ग नवदल देखि उपबन सहज सोभित कुसुमिते
आरे कुसुमित कानन कोकिल साद,
मुनिहुँक मानस उपजु विषाद ॥
साजनि हम पति निरदय वसन्त,
दारुन मदन निकारुन कन्त ॥
अतिमत्त मधुकर मधुर रवकर मालती मधु सञ्चिते
समजेकन्त उदन्त नहिकिछु हमहि विधि वसवञ्चिते ।
वञ्चित नागरि सेहे संसार,
एहि रितु पहु सञो न करु विहार ॥
अति हाव भाव मनोज मारए चन्द रवि ससि भानए॥
पुरुवपाप सन्ताप जतहोअ मनमनोभव जानए॥
जारए मनसिज मार सरसाधि,
चाँदमे देह चौगुन होअ धाधि ॥
सवेधाधि आधि वेआधि जाइति करिअ धैरज कामिनी
सुपहु मन्दिर तोरित जाएत सुरुले जाइति जामिनी।।
जामिनि सुफले जाइति अवसान,
धैरज कर धरणीधर भाँन ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दुइ सत्वर अरु मध्य दोए, चारिताल के राग।
कूरसुनत नहि कबहु पुनि, सोइ सुनत जेहिभाग॥

॥ अथ दण्डक कोडारः ॥

दण्डकाशावरीवृत्ते दण्डकाशावरी यथा॥
तथा दण्डक कोडारे स रागः किल जायते॥

॥ उदाहरणम् ॥

श्री मुरारि पदारविन्द समुल्लसन्मकरन्द तुन्दिल
पूरसुन्दर लहरि पूरित सकल गगन तले।
वज्रलेपसरूपपाप परम्पराविपिनावली
फलमूलपल्लव दाह दर्शित दावनील जले॥
ध्रु० ॥ जयदेवि गङ्गेदुरितसंहति मिन्दुमौलिजटातटादृति-
भंगि तुङ्ग तरङ्ग चङ्गिम तुलितचन्द्रकले।
(इत्यादि सुप्रसिद्धम्) किंच
जघने मधुरिपु भवन आओव। (इत्याद्यपिसुप्रसिद्धम्)
जयदेवि दुर्गे इत्याद्यपीति॥

अथ शुद्ध कोडारः ॥ प० छन्दोलक्षणम् ॥

अष्टाविंशतिपर्य्यन्तं चतुर्विंशतितः कलाः॥
स्युःपञ्चार्द्धेयदीये सः शुद्धः कोडार संज्ञकः॥

॥ उदाहरणम् ॥

जय जय जय नत सतत सिवङ्करि परिहित नरसिरमाले।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

लम्बित रसनि दमनअतिभीषन वसनमिललवघछाले ॥
चौदिसँ मानुसमाँसु मुदितअति फेरुफूकर कत रासे।
मनिमय विविध विभूषने मण्डित वेंदि विदिततुअवासे ॥
भूतपरेत पिसाच निसाचर अगनित जोगिनि जाले।
जखने न जगत जननि तुअ संगति तहँनकहिं अकोंनकाले॥
विमलबालरविमण्डल सनतुअ तीन नयन परगासे।
असुररुहिरमदिरामद मातलि वदन अमिअ समहासे।
तुअ अनुरूप सरूप बुझिअ नहिं तैअओ तोहर गुनगाऊ॥
ऐकेंहि तुअपदवन्ध करिअ देवि निअजने लोचनलाऊ।

इतिममामान्यदीयन्तु वहुविततमत्त ॥

अथ वितताख्यः ॥ एतच्छन्दो लक्षणम् ॥

सप्तविंशतिपर्य्यन्त मेकविंशतितः कलाः।
यदीयेतुपदार्द्धेस्युर्वितताख्यः स सूहवः ॥

॥ उदाहरणम् ॥

साए साए काँ लागि कौतुकें देखल निमिष लोचन आधे॥
मोर मन मृग मरम वेधल विषम वान वेआधे।
गोरस विरस वासि विसेषल छिकेंहुँ छाडल गेहा ॥
मुरलि धुनि सुनि मन मोहल विकेंहुँ भेल सँदेहा।
तीर तरङ्गिनि कदँवकाँनन निकट जमुना घाटे ॥
उलटि हेरैतें उवटि परल चरन चीरल काटे।
सुकृतसुफल सुनह सुन्दरि गोविन्द वचन सारे।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सोरभरमन कंसनराएन मिलत नन्दकुमारे ॥

अथ कामोदकेदारवृत्तेऽपि किल जायते ।
कोडारराागस्तद्वृत्तम्पुरैव समुदाहृतम् ॥

तदेवम् शुद्धकोड र, वितत, दराडक, मोरंगिश्रा, वियोगीति पूर्वप्रतीकमादाय कोडारस्य पञ्च, देशशुद्ध, शुद्धकाम, करुणा, सुन्दर, स्मरसन्दीपन, इति पूर्वप्रतीक मादाय षट्सूद्भवस्य। तस्मादेतत्तयोरेकादश द्वादश वा भेदा भवन्तीति ॥

॥ अथ धनछी ॥

धनाश्री राजविजयावहिरानिविराजितौ ।
जायेते चेतु स्यात्तस्याद्धनछी नाम रागिणी ॥
. . . .

॥ तत्रतु प्रथमा मङ्गली धनछी ॥ एतद्वृत्त लक्षणम् ॥

चतुर्विंशतिमारभ्य यत्रैकत्रिंशदन्तिका: ।
पदार्द्ध कलिका: म तु मंगली धनछी मता ॥

॥ उदाहरणम् ॥

अगर उगार गारि मृगमदरस कएनतुलेपन देह ।
चललि तिमिर मिलि निमिषें अलख भेलि काचकसनिमसिरेह
हेमाधव हेरह हरखिधनि चान उगलजनि महितलें मेटिकलङ्क
घर गुरुजन हेरि पलटति कतवेरि ससिमुखि परमसङ्क ॥
तुअगुनगनकहि आँनलिअ साहिटारि दैए सुमुखिविसवास
तें परि पराइअ जें पुनु पाविअ परधन विनु परयास ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जपल जनम सत मदन महामत विहि सुफलित करु आज ।
दास गोविन्द भन कंसनराएन सोरम देवि समाज ।

सत्वर लितयन्त्वत्र तालस्य गुणि सम्मतम् ॥
हीयते तैर्विनारागस्तान् सम्यक् प्रयोजयेत् ।

॥ अथ पहाड़आ ॥ एतच्छन्द लक्षणम् ॥

चतुर्भिःकलिकाहीनै श्चतुर्मात्रगणैस्समम् ।
पदार्द्धद्वितयर्य्यन्त्र धनछी सा तु पर्वती ॥

॥ उदाहरणम् ॥

कीपर वचनें कन्ले देलकान, की पर कामिनि हरल गेआन ।
की तन्हि विसरल पुरुवक नेह, की जीवन आवे पड़ल सँदेह॥
की परिनत भेल पुरुवक पाप, की अपराधे कएल विहिं साप।
की सखि कओन करव परकार, की अविनय दँहु परल हमार॥
की हमें कामकला एक घाटि, कीदहुँ समयक इहे परिपाटि।
मधुसूदन भन मने अवधारि, की धैरजें नहि मिलत मुरारि॥

॥ तालः पूर्वतुल्यः ॥ अथ पञ्चमसुरा, एतच्छन्दो लक्षणम् ॥

चतुर्मात्रत्रिकंसैक मारभ्य नियमोज्झिताः ।
पदार्द्धकलिका यत्र षोड़शान्तास्तु सा मता ॥
मिथिलागीति गोष्ठीषु धनछीपञ्चमसुस्वरा ।

॥ उदाहरणम् ॥

आकुल चिकुरे बेढ़ल मुखसोभ,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

राहु कएल ससिमण्डल लोभ ॥
उभरल कुसुम मालधर अङ्ग,
जनि जमुनामिलु गङ्ग तरङ्ग ॥
वदन सोहाओन स्रम जलविन्दु,
मदने मोतिलए पूजल इन्दु ॥
पिअमुख सुमुखि चुम्बतेजि ओज,
चाँद अधोमुख पिबए सरोज ॥
कुच विपरीत विलम्बित हार,
कनक कलस वम दूधक धार ॥
किंकिनि सबद नितम्बिनि छाज,
मदन विजय रथ वाजन वाज ॥
भनइ विद्यापति मने अनुमानि,
कामिनि रम पिआ अनुमत जानि ॥

सत्वर द्वितयस्मध्य द्वयश्चैवाल जायते ।
तालानान्तावता(ता)लाश्चत्त्वारः परिकीर्त्तिताः ॥

॥ अथ श्री विमिश्रा ॥ ए वृत्तम् ॥

गणैस्त्रिभिश्चतुर्भिश्च कलान्यूनैः क्वचित्तुतैः ।
चतुर्म्मात्रैः पदानान्तु दलयोर्यत्र निर्म्मितेः ॥
क्रमेण श्रीविमिश्रेयं धनछी गीति सम्मता ।

॥ उदाहरणम् ॥

मलिन कुसुम तनु चीरे,
करपर वदन नयन ढरु नीरे ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कि कहब माधव ताही,
तुअगुन लुबुधि मुगुधि भेलि राही ॥
उरँलुर सामरिवेनी,
कमल कोष जनि कारि नागिनी ।
केअओ सखि ताकए साँसे,
केअओ नलिनीदलें करए बतासे ।
केअओ बोल आएल हरी,
उससिउठलिसुनि नाम तोहरी ॥
सुकवि विद्यापति गावे,
विरहिनि वेदन सखि समुझावे ।
लघु सत्वर तिनि ताल एहि, चलनि होत परगास ।
तातें चुकि सुर चलत तब, गुनी होत उपहास ॥

अथ योगिआ ॥ वृत्तम् ॥

पञ्चविंशति पर्य्यन्तं द्वाविंशति कलावधि ।
ध्रुवान्तार्द्धसमा यत्र पदार्द्धे कलिकाः किल ॥
त्रयोदशकलोपेत ध्रुवाद्यर्द्धे व्यवस्थितिः ।
जोगिआ धनर्छी सा तु मिथिला गीति सम्मता ॥

॥ उदाहरणम् ॥

लाखहुँलना कोटितरुअ जूवति कतन लेख ।
सवहि फूलाँ मधुमधुमग मधुहुँ मधु विसेष ॥
साजनि हमर वचन सूँन ।
सवे परिहरि तोहिइछ हरि अओकि सराहसिपून ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तोरिए चिन्ता तोरिनिरता सेजहु तोरिए ठाम ।
सपनहुँ हरि तोहि न विसरल ए उठ तोरिए नाम ॥
आलिङ्गनवेरॉ पाछुनिहारए तोहविनु सुन कोर ।
हृदयकथा गुपुति वेथा लाजे न छाडए नोर ॥
सरसकवि विद्यापति गाओल निजमने अवधारि ।
जकर पेमें पराधिन वॉलभु सेहे कलावति नारि ॥

अथ शाम्भवी ॥ ५० वृत्तम् ॥

षोडशान्ताःकला यत्र चतुर्दशकलावधि ।
पदार्द्धं वीतनियमा धनछी सा तु शाम्भवी ॥

॥ उदाहरणम् ॥

जय जय शङ्कर जय त्रिपुरारि ।
जय अधपूरुष जय अधनारि ॥
आध धवलतनु आधतनु गोरा ।
आधपटोर आधमुज डोरा ॥
आध जोग आध भोग विलासा ।
आध पिनाक आध नगवासा ।
आध सिन्दुरविन्दु आध विभूतो ॥
आध हाडमाल आध गजमोती ॥
भने कविरतन विधाता जाने ।
दुइकए वॉटल एक पराने ॥

त्वरितत्रितयन्त्वत्र तालस्य परिदृश्यते ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तद्वहिर्भूत रागस्तु कुरागो गुणिनास्मतः ॥
आचतुर्द्दशकात्सप्त दशपर्य्यन्तकाः कलाः ॥
पदार्द्धे यत्र सा प्रोक्ता धनछी तु सुशोभना ॥

॥ उदाहरणम् ॥

सपने आएल सखि मञ्जुपिअ पासे,
तखनुक को कहव हृदय हुलासे ।
ध्रु० ॥ न देखिअ धनुगुन न देखु सन्धाने,
चौदिस परए कुसुमसर वाने ।
वंक विलोचन विगसित थोरा,
चाँद उगल जनि समुद्र हिलोरा ॥
उठलि चेहाए आलिंगन वेरी,
रहलि लजाए सूनि सेज हेरी ।
भनइ विद्यापति सुनह सपने,
जत देखलह तत पुरतौह मने ॥

॥ तदेवं मङ्गली, पहडिआ, पञ्चमसूरा, श्री विमिश्रा, जोगिआ शाम्भवी शोभना, इति पूर्व प्रतीकयोगात्सप्तधा धनछी ॥ अथ गौडमालवः ॥ एतस्यतु गौड मिथिलामादाय भेदद्वयम् ॥ तत्र प्रथमो गौडीयः ॥

॥ ए० वृत्तम् ॥

त्रिंशदारभ्य षट्त्रिंशत्पर्य्यन्ताः कलिकाः किल ।
दशकात्षोडशान्ताश्च माला यत्र पदार्द्धयोः ॥
क्रमादिह तु सः प्रोक्तो गौडीयो गौड मालवः ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥ उदाहर म् ॥

बाँधए विकट जटा त थिहुचदिन फोटा
कत जुगसहस वयस वहि गेला।
उमत महादेवसम तन भेला ॥
मौलि मेलए छार सहज न तेजए पार।
सुकवि विद्यापति गाऊ जिवओ सिवसिंह राऊ ॥

सत्वर द्विकमादाय तालस्यात गतिर्म्मता ॥

अथ मैथिलः ॥ प वृत्तम् ॥

सप्तोत्तरदशान्तास्तु द्वादशावधयः कलाः।
यत्पदार्द्धे सतुप्रोक्तो मिथिला गौडमालवः ॥

॥ उदाहरणम् ॥

गेलाहुँ पुरबपेमे उतरो न देइ, दाहिन वचन वामकए लेइ।
ए हरिरसदए रूसलि रमनी, हमतह न आउतिकुंजरगमनी ॥
गै रमनावहरहओ समाजे, सवतह वडथिक आँखिकलाजे।
जे किछु कहलक से अछि लेले, भलकहिवुझवअपनहिगेले।
भनइविद्यापति नारि सोभावे, रूसलि रमनिपुनुपुनमत पावे

अथ राजविजयः ॥ तत्र प्रथमन्देव पूर्वः ॥ प वृत्त लक्षणम् ॥

अष्टाविंशति पर्य्यन्तम्पश्चविंशतितः कलाः।
यत्पदार्द्धे ध्रुवाद्यर्द्धे यत्रोनत्रिंसदात्मिकाः ॥
सचोत्सर्गाद्देवराज विजयः परिकीर्तितः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥ उदाहरणम् ॥

कतहुश्मश्रुधर कतहु पयोधर भलवरमिलल सुशोभे ।
अधँगँधइलि नारि गुनलि निञगारि गरुअ गौरिगुन लोभे॥धु०॥
आलोशिव शम्भू तुमी शिवशम्भू तुमी जो वधला पचवाने ॥
गाँगँलागि गिरिजाक मनौलि हे कःकेदेवि बोलह मन्दा ॥
चरन नमित फनि मनिमय भूषन घर खिखि आएल चन्दा ॥
भनइविद्यापति सुनह तिलोचन पय पङ्कज मोरि सेवा ॥
चन्दल देइ पति वैदनाथ गति नीलकराठ हर देवा ॥

सत्वरद्वितयचैव मध्यम द्वितयन्तथा ।
एवं रागानुगास्तालाश्चत्वारोगुणिनाम्मताः ॥

॥ अथालानविमिश्रः ॥ एतद्वृत्त लक्षणम् ॥

. . . .
यत्रादश पर्य्यन्तं स्युस्त्रयोदशतः कलाः ॥
पदार्द्धे सोडाना राजविजयः परिकीर्तितः ॥
. . . .

॥ उदाहरणम् ॥

जय जय भगवति भीमा भयानी,
चारि वेदें अवतरु ब्रह्मवादिनी ॥
हरिहर ब्रह्मा पुछइत भमें,
एकओ न जान तुअ आदि मरमें ॥
भनइ विद्यापति राए मुकुट मणि,
जिवओ रूपनराएन नृपति धरणि ॥

लघु सत्वर अरु मध्य एहि, तीन ताल शुभ होत ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तीनिलिङ्गे जओ गाइअए, तओहोत रसन के सोत ॥

॥ अथदेश राजविजयः ॥ एतच्छन्दो लक्षणम् ॥

द्वादशाद्यधियत्नस्युः कलिकाश्चाचतुर्दश ।
यत्पदार्द्धे स विज्ञेयो देशराजस्तु गायकैः ॥

॥ उदाहरणम् ॥

जातिपदुमिनि सहतिकता, गजेंदनसलि दमनलता ॥
लोभेअधिकमूल न मार, जे मूलराखए से वनिजार ॥
अछलजोर सिरीफल भाँति, कएलहछोंलग नारँग काँति॥
भनइविद्यापति न कर लाथ, भूषल न खाह दूहू हाथ ॥

सत्वरद्विनयम्मध्य द्वयन्ताल चतुष्टयम् ॥
एतद्विहीनोऽयं रागः कुरागइति निश्चितम् ॥

॥ अथ कानरा मिश्रः ॥ ए वृत्त लक्षणम् ॥

चतुष्कलचतुष्कात्तु कलान्यूनात्कलाष्किल ॥
ऊनविंशतिपर्य्यन्ताः स्युष्पदार्द्धे तु यत्नवै ॥
स रागष्कानरा राजविजयःपरिकीर्त्तितः ॥

॥ उदाहरणम् ॥

नमओ नमओ चण्डी चरनयुगल तोर ।
तोरित दुरित हर देहै अभय वर ॥
कटकट दसन रसन लहलह कर ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

खडगें खण्डिए चण्डी रुहिर खपर भर ॥
हेरजोह खोहकरि धरए तुरए सरि ।
मूहमेलएरुहिर घटघट घोटकरि ॥
लखनचन्द राए करए तुअभगवति ।
देहे अभयवर निजपद जुगरति ॥

जायते गुणिभिर्दत्त एकएवाल मध्यमः ।
तालस्तेनामुनाहीनो रागोऽयं कुत्सितो मतः ॥

अथ मङ्गलराजविजयः ॥ एतच्छन्दो लक्षणम् ॥

चतुष्कल लिकंसैकमारभ्य नियमोज्झिताः ।
चतुष्कल चतुष्कान्ता यत्पदार्द्धं कलाष्किल ॥
मङ्गलोत्तरनामायं राजपूर्वो भवेदिह ।

॥ उदाहणम् ॥

साँझक अतिथ भागें विहिआन,
विमुखें पापवड़ अछए गेआन ।
हमरेओ कन्त वसए परदेस,
अथिकपथिक देखिमोहिकलेस ॥
पथिकवास भमि जनतए लेह,
हमरा दोसर तेसरनहि गेह ।
चतुरचतुरभुज ई रस जानि,
कौसलेंअभिमतकरए सआनि ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तालस्त्रिनयमत्रास्ति गुणिनाङ्गण सम्मतम् ।
तावद्भिः कृतसारथ्यो रागोऽयमनुरञ्जकः ॥

॥ अथ मनमोदः ॥

पञ्चविंशतितोयत्र त्रिंशदन्ताष्कलाःकिल ।
पदार्द्धे मनमोदाख्य स्सभवेद्राज पूर्वकः ॥

॥ उदाहरणम् ॥

सखिमधुरिपुसन के कतए सोहाओन
जदि अतन्हिकउपामहे ।
तसुमननेओछन सरदसुधानिधि
पङ्कज के लेत नाम हे ॥
ध्रु० ॥ सखि आज मधुरिपुदेखलमोजेहटिआ
लोचन जुगल जुडएला ॥
अधरबाँहि लोचने जखनें निहारलन्हि
वाँककइएभोंहभङ्गा ।
तखनुक अवसर जागल पचसर
थानें थानें गेल अङ्गा ।
दरसन लोभे पसार देल हमें
सखिमुखे सुनि वड रसी ॥
तखने उपजुरस भेलिहुँ परवस
विसरलि दुधहुँ कलसी ।
दानकलपतरु मेदिनि अवनरु

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नृप हिन्दू सुलताने ॥
मेधादेइपति रूपनराएन
प्रणवि जीवनाथ भाने (हे)

सत्वरमध्यम तीनिकरि, चल चलनि मे ताल।
एआमें मिलि सुरहोत तव, रस उपजतसुविशाल॥

॥ अथ भठिआलपूर्वः ॥ ए वृत्तम् ॥

अष्टाविंशतिपर्य्यन्त स्पञ्चविंशतितः कलाः।
यत्पदार्द्धं तु सभवेद्भठिआली राज पूर्वकः॥

॥ उदाहरणम् ॥

जयजय दुर्गं दुर्गतिहारिनि सवसिधिकारिनि देवी।
भुगुति मुकुति दुहु दुखें विनु पावित्र पदपङ्कज सेवी॥
विष्णु विरञ्चि विभावसुवासव शिवतुअधरएधेआने।
आदिसक्तिभगवति भयभाविनि केओनअन्ततुअजाने
तनुअतिसुन्दर मरकतमनिजनि तीनिनयन भुजचारी
शंखचक्रशर करधनुधारिनि शशिशेखर अनुसारी।
मनिमय कुण्डल हारमनोहर नेपुर घन हन वाजे॥
किंकिन रन रन सुललित कंकन भूषनविविध विराजे।
पञ्चाननवाहिनि दाहिनि होह सुमरि महेशविमोही॥
मदानन्द कह चरनजुगलतुअ सरनकएल जग जोही।
सत्वर मध्यम तीनि ताल तें विनु रागिनिहोइति वेहाल।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तदत्र देवराज, अलानराज, देशराज,कानरराज, मंगलराज,मनमोदराज भठिआलराज, इत्येवंसप्तविधराजविजय उक्तः ॥

॥ अथ नाटः ॥

मलारी सुरमादाय किञ्चित्कामोद वादने ॥
नाटरागसमुत्पत्तिं वदन्तिकिल गायकाः ॥

अथातः परमेतद्भेदाः तत्र प्रथमं शुद्धः ॥ प० वृत्त लक्षणम् ॥

षट्कलद्विकपर्य्यन्ता द्विकलोन ततः कलाः ।
यत्पदार्द्धे भवेदत्र शुद्धनाटस्स एव हि ॥

॥ उदाहरणम् ॥

मृगमदपङ्कअलका मुखजनुकरह तिलका ।
सँ पुनपुनि के चन्दा कलकें होएतगए मन्दा ॥
सहजें सुन्दरि वंडिराही कि करति अधिकपसाही ।
उजर नयन नलिना काजरें न करु मलिना ॥
दूधक धोएल भमरा मसि बुडि जाएत समरा ।
पीनपयोधर गोरा उलटल कनएक चोरा ॥
चाँदने धवल न करु हिमेंझापि जएत सुमेरु ॥
विद्यापति हेन कवी कतए तिमिर जहाँ रवी ।
रूपनराएन पहू तौलि हलत गुरु लहू ॥

तालद्वितयमेवात्र विद्यते गुणिसम्मतं ।
तमादाय यदागानं क्रियते सुस्वरस्तदा ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ मलारी नाटः ॥ ५० छन्दो लक्षणम् ॥

चतुष्कल चतुष्केन यद्ध्रुवाद्यर्द्धं निर्म्मितिः ।
ध्रुवान्तार्द्धेतु यत्रस्यात्पदार्द्धान्तरवस्थितिः ॥
पञ्चविंशतितः किञ्च त्रिंशदन्ताः कलाः किल ।
यत्पदार्द्धेतु सम्भवेन्मलारी नाट संज्ञकः ॥

॥ उदाहरणम् ॥

गगनगरज मेघा उठय धरणिथेघा पचसरहिअगेलसाली ।
सुमुखि देहखिन जिउतिआजुक दिन केजान कि होइतिकाली
ध्रु० ॥ माधवमनदए सुनतसुवानी ॥
कुजन निरूपि सुजनसखि संगति जे किछुकहएसआनी ॥
की हमे साँझक एकसरि तारा भादव चौठिक चन्दा ॥
ऐसनकएपिआजे मोरसुख मानल मो पति जीवन मन्दा ॥
वामहु गति जत समदि पठओलन्हि से सवे कहि कहि गेली॥
तेरसि तिथि ससि सामर पख निसि,दसमि दसा मोरिभेली ।
भनइ विद्यापति सुन वरजौवति मने जनु मानह आने ॥
राजा सिवसिंह रूपनराएन लखिमा देवि रमने ।

॥ परञ्च ॥

रयनि काजर वम भीम भुअङ्गम कुलिश परए दुरवार ।
गरजें तरस मन रोसें वरिस घन संसजे परु अभिसार ॥
॥ ध्रु० ॥ सजनी वचन छडैतें मोहि लाज ॥
जे होएअ सेहोअओवरु सवे हमेंअँगिकरु साहसँ मनदएआज

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ठामहि रह्नि अघूमि परसें चिन्हि अ सुमि दिगमगँ उपजु सन्देह
हरि हरि सिव सिव तावे जाइह जिव जावे न उपजु सिनेह
चरन वेढ़ले फनि हितकए मानलधनि नूपुर न करत रोर ॥
सुमुखि पुछओ तोहि सरुप कहसि मोहि पेमक कतएक ओर ।
अपन सुहितमित देखिअ से परत खनपाइअ पेमक ओर ॥
चाँद हरिन वह राहुक वल सह पेम पराभव थोर ।
भनइ विद्यापति सुनह सुचेतनि गमन न करह विलम्वे ॥
राजा सिवसिंह रूपनराएन सकलकला अवलम्वे ॥

सत्वररद्वितयम्मध्य द्वितयन्तावता पुनः ।
चतुष्टयन्तु तालानां जायतेराग मध्यगम् ॥

॥ अथ शंकुक नामा ॥ एतच्छन्दो लक्षणम् ॥

द्वादशावधयो यत्र षोडशान्ताः कलाःकिल ।
यत्पदार्द्धेसशङ्कूकनाटस्तु समुदाहृतः ॥

॥ उदाहरणम् ॥

दूरहि ऊरु रहल गहिठाम, चरने पाओल थलकमलउपाम ।
सेदविन्दु परिपूरल देह, मोतिम फरलि सौदामिनि रेह ॥
संकेत निकेत मुरारि निहारि, अपनि अधिनि नहि रहलिएनारि
पुलकित भेल पयोधर गोर, दगध मदन पुनु आकुर तोर ।
वजइतें वचन भेल सरभंग, कदलीदल जकेंकाँपए अंग ॥
रसमय स्याम सुन्दर कविगाव, सकल अधिक भेल मन्मथभाव
कृष्णनराएण ई रस जान, कमलावतिपति गुनकनिधान ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥ परञ्च ॥

करतल कमल नयनढर नीर,
न चेतए कुन्तल सँभरन चीर ।
तुअपथ हेरि हेरि चितनहि थीर,
सुमरि पुरुवनेहा दगधसरीर ॥
कतें परि माधव साधव माँन,
विरहि जुवति माँग दरसन दान ।
जलमधे कमल गगनमधे सूर,
आँतर चाँदहु कुमुद कत दूर ॥
गगन गरज मेघा सिषर मयूर,
कत जन जान सिनेह कत दूर ।
भनइ विद्यापति विपरित मान ,
राधा वचने लजाएल कान्ह ॥

॥ परञ्च ॥

गगन गरज घन जामिनि घोर,
रतनहुँ लागि न सञ्चर चोर ।
एहना तजि अएलाहु निअगेह,
अपनँहुँ न देखिअ अपनुक देह ॥
तिला एक माधव परिहर मान,
तुअलागि संसञे परल परान ॥
दुसह जमुना नरि ऐलिहु भाँगि,
कुचजुग तरल तरनि तँ लागि ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

देह अनुसन हे जुझयो पञ्चवान,
तोहेसन नगर नागर नहि आन ॥
भनइ विद्यापति नारिसोभाव,
अपनुक अभिमत उकुति बुझाव ।
राजा रूपनराएन जान,
राए सिवसिंह लखिमादेइरमन ॥

काललितयसस्पन्ना गतिरेषाविराजते ।
राजतेतैर्विनारागः सोऽयं नैवात्र कुत्रचित् ॥

अथ कामोद नाटः ॥ प छन्दो लक्षणम् ॥

चतुष्कल त्रिकात्सैकादारभ्यनियमोज्झिताः ।
चतुष्कल चतुष्कान्ताः कचित्सैकाधिकास्तनः ॥
सत्पदार्द्धद्वयोरन्ये स्युस्समाः किल ।
कलिकास्सतु कामोदनाट इत्यभिधीयते ॥

॥ उदाहरणम् ॥

जयजय भगवति जय महामाया,
त्रिपुरसुन्दरिदेविकरुदाया ।
ध्रु० ॥ आहेमाता दालिमकुसुम सम तुअतनुछवी
तखने उदितभेल जनिरवी ।
धनुसर पास अंकुस हाथ,
तेतिसकोटिदेव नाव माथ ॥
चड्डिम इपमत केओ पाव,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कामरमनिं दासि पदपाव ।

सत्वरङ्गितयस्मध्य द्वयञ्च परिदृश्यते ।
तालानान्तावतातालाश्चत्वारः परिकीर्त्तिताः ॥

॥ अथोत्तमः ॥ एतच्छन्दो लक्षणम् ॥

ह्रस्वमर्धन्ततोदीर्घमेष एवक्रमः पदे ।
ह्रस्वार्द्धे लिदशान्ताश्च कला यत्र दशादिकाः ॥
दीर्घार्द्धेचाष्टविंशान्ताः पञ्चविंशतितः कलाः ।
नियमाद्विगतास्तुस्युर्न्नाटोऽय मिहतूत्तमः ।

॥ उदाहरणम् ॥

सखि हे वालँभ जितव विदेसे,
हमेकुल कामिनि कहइते अनुचित, तोहन्हुँ देहुन्हि उपदेसे॥
ईन विदेसक वेली,
दुरजनेंहमर दुख न अनुमापव, तें तोहें पिआ गेल एली।
किछुदिन करथु निवासे,
हमे पूजल जे सेहे पए भुजव राखथु पर उपहासे ॥
होएता हे किए वघ भागी,
जहिखने हुन्हि मनें माधव चिन्तव हमहुँ मरव घसि आगी
विद्यापति कवि भाने,
राजा सिवसिंह रूपनराएन लखिमादेवि रमने ॥

तदेवम् शुद्ध मलारी, शंकूक, कामोद, उत्तम, एतत्पूर्व प्रतीकमादाय नादः पञ्चधा, । इदन्तु वोध्यम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अवान्तर बहुभेदवतामल्पभेदवताञ्च रागाणां तत्त दुत्पत्ति साधनीभूत तत्तद्गीतमादाय तावदन्यान्यतम गीतोत्पत्तिकत्वन्तत्तच्छन्दो घटित गीतोत्पत्तिक स्वरान्तरभेदभूत तत्तद्रागानेव वादाय तावदन्यान्यतमत्वं वा लक्षणमस्त्वेकतश्चैतत्। वस्तु तस्तु विजातीय विजातीय सुखजनकतावच्छेदकतया सिद्धा स्तास्तास्तत्तद्राग गता जातय एव तत्तद्राग लक्षणमिति । अवान्तरभेदानाञ्च तदुक्तमेवेतिदिक् ॥

॥ अथ संकीर्णासंकार्ण मैथिल रागाणामेकीकृत्य गणना ॥

ललिता विभासी तदनु भैरव्यहिरानि वराडी च ।
गोपीवल्लभगुजरी रामकली कापि शारङ्गी ॥
कौशिक कोडाराख्यौ वसन्तो धनछी तथा ।
असावरी च श्रीरागो गौडा मालव मालवौ ॥
भूपाली राजविजय नादाः कामोद देशाखौ ।
केदारोऽथ मलारी इत्येते मैथिलाः कथिताः ॥

तदेतानेतावदवान्तरभेदाँश्चादाय रितुराजमन्तरा तीरभुक्ति देशीयाः सप्तनवतिसंख्यकारागा वेदितव्याः ॥ वेदितव्यानि च तावत्संख्यकानि तीरभुक्ति देशि गीतान्यपीति ॥

इति श्री लोचन शर्म्म विरचितायां रागतरङ्गिण्यां तीरभुक्ति देशीय संकीर्णराग विवरणन्नाम चतुर्थस्तरङ्गः ॥

देशान्तर देश्यश्च कियत्यो लेख्या इत्यधुना न लिख्यन्तेताः ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥ अथ यंत्रजादि राग सामान्योत्पत्युपयुक्तसंस्थितिसाधनीभूत स्वरसंज्ञा प्रकरणम् ॥

स्व स्व शेष श्रुतित्यक्त्वा यदारिषभ धैवतौ ॥
गीयते गुणिभिस्सर्वै स्तदा तौ कोमलौ मतौ ॥
गृह्णाति मधुमस्यापि गान्धारः प्रथमां श्रुतिम् ॥
यदा तदा जनैरेष तीव्र इत्यभिधीयते ॥
द्वितीयामपि चेदेवं तदा तीव्रतरः स्मृतः ॥
चतुर्थीमपिचेदेव मतितीव्रतमः स्मृतः ॥
अतितीव्रतमोगस्तु शारङ्गे परिगीयते ॥
षड्जस्य च निषादश्चेद्गाधारः प्रथमां श्रुतिम् ॥
तदा सङ्गीतिभिस्सोऽपि तीव्र इत्यभिधीयते ॥
द्वितीयामपि चेदेवं तदा तीव्रतरः स्मृतः ॥
तृतीयामपि चेदेवं तदा तीव्रतमः स्मृतः ॥
षड्जस्य द्वे श्रुती गृह्णान्निषादः काकली स्मृतः ॥
तीव्रतमेनिषादे च गेया सैव विचक्षणैः ॥
सपयोरिधयोश्चैव तथैवगनिषादयोः ॥
सम्वादः कथितो विज्ञैस्सयोःस्वरयोर्मिथः ॥
हृदि मन्द्रो गलेमध्यो मूर्ध्नितार इति क्रमात् ॥
द्विगुणः पूर्व पूर्वस्मात् स्वरः स्यादुत्तरोत्तरः ॥

॥ इति स्वरसंज्ञा ॥ अथ स्वरश्रुति विभागः ॥

द्वाविंशतिस्तु श्रुतयः सुराणां भागशः स्मृताः ।
तद्यथा श्रूयतान्तावत्सङ्गीताद्बुद्धिपारगैः ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तीव्रा कुमुद्वती मन्दा छन्दोवत्यस्तु षड्जगाः ।
दयावती तुरेञ्जया रञ्जनी रक्तिकेत्यसूः ॥
रौद्री क्रोधाच गान्धारे वज्रिकाथ प्रसारिणी ॥
प्रीतिश्च मार्ज्जनीत्येताः श्रुतयो मध्यमाश्रिताः ॥
क्षितीरक्ता च सन्दीपिन्यालापिन्यथ पञ्चमे ॥
मदन्ती रोहिणी रम्ये त्येताधैवतसंश्रयाः ।
उग्रा च क्षोभिणी च द्वे निषादेव सतां श्रुती ॥

....

वीणायां सर्व रागाणां स्वराणां संस्थितिस्तु या ॥
तस्यावादनमात्रेण स्वरव्यक्तिः प्रजायते ।
तास्तु संस्थितयः प्राच्यो रागाणां द्वादशस्मृताः
याभीरागा प्रगीयन्ते प्राचीनाराागपारगैः ।
तास्तु, भैरवी टोडिका तद्वद्गौरी कार्णाट एवच ॥
केदार ईमनस्तद्व च्छारङ्गो मेघरागकः ।
धनाश्री पुरवी किञ्च मुखारी दीपकस्तथा ॥
एतेषामेव संस्थाने सर्वेरागाः व्यवस्थिताः ।
यथा यद्रागसंस्थानं तत्तथैव वदाम्यहम् ॥
शुद्धाः सप्तसुरारम्या वादनीयाः प्रयत्नतः ।
तेन वादनमात्रेण भैरवी जायते शुभा ॥
अन्येतु भैरवीरागे धैवतङ्कोमलं विदुः ।
तदशुद्ध र्यँतस्ताद्दक् नायं रागोऽनुरञ्जकः ॥

॥ इति भैरवी संस्थानम् ॥

शुद्धाः सप्तस्वराष्कार्य्या रिधौतेषु च कोमलौ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

टोडीस्तुरागिणी गेया ततो गायकनायकैः ॥

॥ इति टोड्याः ॥

एवं सति च गान्धारो द्वेश्रुती मध्यमस्यचेत् ।
गृह्णाति काकलीनिः स्यात्तदा गौरी प्रवर्त्तते ॥

अस्यार्थः । ऋषभधैवतौ कोमलौभवतः गान्धारश्च मध्यमस्य श्रुतिद्वयं गृह्णाति ॥

तदा कानराख्यात कार्णाट संस्थानं भवतीत्यर्थः ॥

॥ इति कार्णाट संस्थानम् ॥

गान्धारो मध्यमस्य श्रुतिद्वयं गृह्णाति, निषादश्च षड्जस्य श्रुतिद्वयं गृह्णाति, तदा केदार संस्थानं भवतीत्यर्थः ॥

॥ इति केदार संस्थानम् ॥

एवंसति च संस्थाने मध्यमः पञ्चमस्य चेत् ॥
गृह्णाति द्वे श्रुती राग ईमनो जायते तदा ॥

॥ इति ईमन संस्थानम् ॥

गान्धारो मध्यमस्य श्रुतिद्वयं गृह्णाति, मध्यमश्च पञ्चमस्य श्रुतिद्वयं गृह्णाति निषादश्च षड्जस्य श्रुति द्वयं गृह्णाति मध्यमः शुद्धो भवति, तदा मेघरागस्य संस्थानं भवतीत्यर्थः ॥

॥ इति मेघ संस्थानम् ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रिषभः कोमलोगस्तु द्वे श्रुती मध्यमस्य चेत् ॥
गृह्णाति द्वे श्रुतीमश्च पञ्चमस्य विशेषतः ॥
धैवतश्कोमलोनिश्च षड्जस्य द्वे श्रुती तथा ॥
गृह्णाति रागिणी रम्या धनाश्रीर्ज्जायते तदा ॥

रिषभश्कोमलो भवति निषादः षड्जस्य श्रुतिद्वयं गृह्णाति तदा धनाश्रीसंस्थानं भवतीत्यर्थः ॥

॥ इति धनाश्री संस्थानम् ॥

औडवः पञ्चभिः प्रोक्तः स्वरैः षड्भिस्तुखाडवः ॥
इमन स्वरसंस्थाने निषाद प्रथमां श्रुतिम् ॥
गृह्णाति धैवतश्चैषा पूर्वायाः स्वरसंस्थितिः ॥

गान्धार मध्यमस्य श्रुतिद्वयं गृह्णाति, मध्यमः पञ्चमस्य श्रुतिद्वयं गृह्णाति, निषादः षड्जस्य श्रुतिद्वयं गृह्णाति, धैवतश्च निषादस्यैकां श्रुतिं गृह्णाति ॥
तदा पूर्वा संस्थानं भवतीत्यर्थः ।

॥ इति पूर्वा संस्थानम् ॥

शुद्धाः सप्तस्वरास्तेषु धैवतः कोमलो भवेत् ॥
वीणायां जायते शुद्धा मुखारी संस्थितिस्तदा ॥

शुद्ध सप्तस्वरेषुचेद्धैवतश्कोमलो भवति, तदामुखारी संस्थिति र्भवतीत्यर्थः ॥ इति मुखारी संस्थितेः ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सर्वैर्स्मिलित्वा दीपकोऽपि लेख्यः ॥

॥ अथ स्वरजातयः ॥

सम्पूर्णा ब्राह्मणाः प्रोक्ताः क्षत्रियाः षाडवा मताः ।
औडवाः कथितावैश्या शूद्रास्तदितरेक्कचित् ॥

॥ इति ॥

नीलाम्बरी सदाज्ञेया भैरवीरागिणी स्थितौ ।
टोडीसुरागिणी कापि सुस्थितौ सैव गीयते ॥

॥ अथ गौरी संस्थितौ ॥

मालवस्यादुगुणामयः श्री गौरी च विशेषतः ॥
चैती गौरी तथा प्रोक्ता पहारी गौरिका पुनः ॥
देशी टोडी देशकारो गौरोरागेषु सत्तमः ।
त्रिरणः स्यान्मुलतानी धनाश्रीश्च वसन्तकः ॥
रामकरी तथा गेया गूर्ज्जरी वहुली ततः ।
रेवा च भठिआलश्च षड्रागस्तथोत्तमः ॥
मालवः श्रीपञ्चमः किञ्च जयत श्रीश्चरागिणी ।
आसावरी तथा गेया देवगान्धार एवच ॥
सिन्धी आसावरी गेया गेया गुणकरी तथा ।
गौरीसंस्थानमध्ये तु एते रागा व्यवस्थिताः ॥

॥ अथ कार्णाट संस्थितौ ॥

षाडवष्का नरो रागो देशीविख्यातिमागतः ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वागेश्वरी कानरश्च खम्भाइची तु रागिणी ॥
सोरठः परजोमारु जैजयन्तो तथापरा ॥
ककुभापि च कामोदः कामोदीलोकमोदिनी ॥
केदारी रागिणी रम्या गौरःस्यान्मालकौशिकः ॥
हिन्दोलः सुघराइस्यादडानो राग सत्तमः ॥
गोरा कानरनामा च श्रीरागश्च सुखावहः ॥
कार्णाटसंस्थितावेते रागाः सन्तीतिनिश्चितम् ॥
केदारस्वरसंस्थाने श्रुतश्केदारनाटकः ॥
आभीरनाटनामा च गेयोरागस्तथापरः ॥
खम्भावती ततो गेया शङ्कराभरणस्तथा ॥
विहागरा च हम्वीरःश्यामः श्रुतिमनोहरः ॥
छायानाटश्च भूपालो गेया भीमपलाशिका ॥
कौशिकस्तु तथा गेयो मारु रागो विचक्षणैः ॥
ईमनस्वरसंस्थाने शुद्ध कल्याण ईरितः ॥
पुरिआ विदिता लोके जयत्कल्याण एव च ॥
शारङ्गस्वरसंस्थाने प्रथमा पटमञ्जरी ॥
वृन्दावनी तथा गेया सामन्तो वडहंसकः ॥
मेघरागस्य संस्थाने मेघो मल्लार एव च ॥
गौडशारङ्ग नटौ रागौ वेलावली तथा ॥
अलहिआ तथा गेया शुद्धसूहव एव च ॥
देशिसूहव देशाखो शुद्धनाटस्तथैव च ॥
धनाश्री स्वरसंस्थाने धनाश्रीर्ल्ललितास्तथा ॥
पूर्वायाः स्वरसंस्थाने पूर्वैव परिगीयते ॥
सर्वेषामथरागाणां ये ये तु क्रमतः स्वराः ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तेषु सर्वस्वरेष्वाद्यः षड्जएवाभिधीयते ॥

॥ तथहि ॥

सरिगामपधानिः सः सनिधाः पमगारिसौ ।
रोहावरोह योगेन सम्पूर्णा भैरवी मता ॥

एवं, तत्तद्रागस्वरारोहा वरोहास्त्वन्यत्र द्रष्टव्या, इहतु विस्तरभयान्न लिखितः ॥

अथ सकलदेश साधारण गुणिगणप्रसिद्ध रागसङ्कराः ।
तत्र × + × × + + + × + + + × + + × + × ×
× + + × + + × × + + + × × × × × धाहेति ।
पाओस में रसपाएवहु क्या सरिता के सोत ॥
प्रथम कामोद सो शुद्ध जुत, राग रमन सामन्त ।
तिलक कल्याण कामोद पुनि, मुनिवर भरत भनन्त ॥
शुद्ध मिलाए जोगाइअइ, अएसोइ शुद्ध कामोद ।
कामोदभारजाजदिमिलए, साओतक्ए प्रमोद ॥
तिलकआदि षट्राग यदि, सुद्ध मिलें कामोदहि होए ।
तासओ तिलक मोदभर, सुखद कहए सवकोए ॥
ईमन गुणड दुहू मिलें, वजएजओ वीनामाह ।
होत कल्याण कामोद सो, रागनि में नरनाह ॥
गौरी श्यामा गुजरी, आसावरी गँधार ।
मिलैं वडारी जगत में, ए खट् राग विचार ॥
आसावरी अओ गुजरी, मिले गुनकरी होत ।
सिवराष्ट्र मिलिकए धनासिरी, कुम्भारी के गोत ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मालसिरी मल्लार अरु, शुद्ध सकलसुर होए।
तेईसओ मधुमाधवओ जग कहत संगीती लोए ॥
नटनारायण तेजरहि हरभूषन जग होइ।
तामे शुद्ध संयोगहू रागस······ती सोइ ॥
मालव अचल धनासिरी दुर्गा चैती चारु।
इन्ह के सब संजोग तें, हए वडहँस विचारु॥
कानर धवल दुहू मिले. होत जो पुरिआ राग ।
एआ······································ ॥

श्रीमद्वेलावलाद्गुराड योगात्कामोद पञ्चकम् ।
तला॥द्यः शुद्धयोगात्तुद्वितीयोऽपि च वक्ष्यते ॥
कामोद्भार्य्या मिलनात्सामन्ताख्यो भवेत्सतु ।
तिलकादिक षड्राग योगात्तु तिलकादिकः ॥
कल्याणाद्यो भवेद्गुराड श्रीमदीमन योगतः ।
वरारी गुजरी गौरी श्यामाचासावरीति च ॥
गान्धारसंयुताएताः स्युःषड्रागा इतीरिताः ।
गुजर्य्यासावरीयोगाच्छ्रीमद्गुणकरीमता ॥
शिवराष्ट्रमिलनाद्धन्या धनास्त्री कुम्भरीति च ।
मालस्त्रीशुद्धमल्लारै र्मधुमाधवि निर्म्मितिः ॥
हरभूषण शुद्धाभ्यां नटनारायणेन च ।
सरस्वत्याः समुत्पत्ति र्धनास्त्री मालवाचलैः ॥
गौर्य्या च वडहंसः स्यात्कानराद्धवलादपि ।
पुरिआ रागिणी सैव मङ्गलाष्टक शब्दिता ॥
केदाराचज गौरी र्मिल्लेङ्कादहन नामकः ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गान्धारो गूजरी श्यामा रामकर्य्यथचेद्भवेत् ।
पुरवी गुणकरीयोगाद्वल्लभः शक्तिमान्भवेत् ॥
वेलाओल केदारा योगतो हरभूषणः
वेलाओल केदारा कल्याणौरीमनस्सम्भृतः ।
गोर्य्यासावरी देव गिरिभिर्भैरवादपि ॥
सिन्धुसंयोगतः प्रोक्तो गान्धारः पृथवीतले ।
धनास्त्री कानरायोगा द्वागेश्वर्य्याख्यरागिणी ॥
फिरोदस्तस्तु पुरवी गौरी श्यामाभिरेव च ।
वराडी वङ्गपालाभ्यां विभासमिलनादपि ॥
आडानारागिणी प्रोक्ता फिरोदस्ताद्धनेन च ।
कानरायोगतः प्रोक्ता सहाँनाकापि रागिणी ॥
मारुधवल कुम्भारी धनास्त्रीमिलनाद्भवेत् ।
पटमञ्जरी ततः शुद्धाच्छङ्कराभरणादपि ॥
मल्लार कानराभ्याश्च देशाखः समुदीरितः ।
गौड़ शारङ्गमिलनाद्भवेद्वेलावली भुवि ॥
तल सोरठ कौरव्या मिलनात्कौमुदीमता ।
मारूधवल केदारा जयत्स्री मिलनाद्भवेत् ॥
घण्टोलनामकोराग स्संगीतिभिरुरीकृतः ।
पुरवीशैलजादेव गिरिभिर्गुण्ड योगतः ॥
द्वारवत्याख्यसंकीर्णा रागिणीलोक दुर्ल्लभा ।
धनास्त्रीपुरियाभ्याश्च भवेद्भीमपलासिका ॥
मालस्त्री शुद्धसंयोगान्मलार मिलनादपि ।
खम्भावत्यास्समुत्पत्तिं वदन्ति किल गायकाः ॥
शैलजादेशकाराभ्यां टोडीतोपि वराडिका ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

षड्रागासावरी देश्यो हेतुर्गन्धावरीभवेत् ॥
सरस्वत्यथमारु च केदारापि मनोहरा ।
विहागरा समुत्पत्ति निदानं त्रितयं मतम् ॥
जयच्छ्रीदेशकाराभ्यां ललिताच्च लिलावती ।
मालवाचलगौडीभिस्त्रिवणामिलनान्मतः ॥
गुणिगोष्ठीषु विख्यातः कोऽपिरागो मनोहरः ।
हंवीरईमनाच्छुद्ध केदारा योगतः स्मृतः ॥
पूर्वा श्री रागयुक्ताचेत्कानरा किञ्चिदंशतः ॥
भैरवात्किञ्चिदादाय तदा टङ्कः प्रवर्त्तते ।
मलार मिलनात्किञ्च केदारा नागकध्वनिः ॥
गुजर्य्यादेशकारश्चे त्कल्याणोऽपि युतोभवेत् ।
अहीरी रागिणी रम्या तदैव भुवि जायते ॥
शङ्कराभरणांनाटः सोरठी सङ्गतो यदि ।
तदा तु रभसादिः स्यान्मङ्गलाकापि रागिणी ॥
गान्धारी गुजरीतद्व द्वङ्गालीपञ्चमस्तथा ।
भैरवी संयुतैरेतैर्भवेच्छौराष्ट्र नामकः ॥
खम्भारी पुरियाटोरी योगान्नारायणो मतः ॥
मनोहरयुत स्तद्वन्मालवो राज हंसकः ।
मालश्रीशुद्धटङ्कैस्तु भवेद्भीमपलासिका ॥
श्रीमन्मालव गन्धार वडहंसैर्युतोहरः ।
षड्रागधवल हंसै र्देशीटोडीयुतैर्भवेत् ॥
पुरवीशुद्धसारङ्ग र्देवगिर्य्यपि रागिणी ।
कानरायुत कल्याण संयुता चेद्विहागरा ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तदा तु गीति विख्याता रागष्कोलाहलोमतः ।
शङ्कराभरणोपेत मालश्री संयुतो यदि ।
धीरागः सुखदः कोऽपि भवेच्छ्री रमणास्तदा ॥
केदारा पुरवी वेलावलीभिः ककुभामना ।
सरस्वत्या तु कुम्भारी मालश्रीयोगतोऽपि च ॥
देवकारी भवेत्कापि कदाचिच्छ्रूयते तु सा ।
श्यामा रामकरीभ्याञ्च श्रीमद्गान्धार योगतः ॥
वहलोपेत गूजर्य्या मङ्गलोपेत गूजरी ।
वराडी गौडिकाचैत्यः श्रीपूर्व रमणोऽपि च ॥
एतेषां सङ्करात्कोपि विचित्रा नाम रागिणी ।
गौरीललितयोर्देशकारसंयोगतः किल ॥
त्रिमल्लनामकोरागः संगीति गीति सम्मतः ।
आडाना कानरा वेलावलीभिर्न्नटपूर्व्वकात् ॥
नारायणात्समाख्याता कलाइ नाम रागिणी ।
पुरिया मधुमाधवी राग योगाद्वागेश्वरी मता ॥
वडहंसटङ्कगौर्य्याश्चश्रीरागोराग सत्तमः
पुरियावेलावलीतद्व त्ककुभापि केदारिका ॥
एषांपरस्परं योगादद्विनादोपि सम्मतः
शङ्कराभरणांगौरी मधुपूर्वाच माधवी ॥
वेलावलीपरस्तद्व दहनोलङ्कपूर्वकः ।
परस्परममीषाञ्च संयोगान्नटपूर्वकः ॥
नारायणो भवेद्रागः सुरलोकेपि दुर्ल्लभः ।
ललितपञ्चम पूर्वाभिर्ल्लीलावते मनोहरौ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

युतौचेत्तत्र हिन्दोल स्तदैव किल जायते।
श्रीमत्कल्याणकामोद सामन्तैर्म्मेघ रागकः॥
मलारनटशारंग्यस्तद्वद्वेलावली किल।
देवगिर्य्या तु संयोगादेतेषां पञ्चम स्मृतः॥
हिन्दोलादर्द्धमर्द्धार्द्धं कानराशगतोऽपि च।
पुरिआतोऽपितावत्स्या त्समादाय तु भैरवः॥
शङ्कराभरणांतद्वत्कानरा मधुमाधवी।
एतावद्योगतः प्रोक्ता कानरासत्सुखावहा॥
केदाराहीरनाटौ शुद्धोधवल एव च।
वागेश्वरी कानरश्च योगात्स्यान्मधुमाधवी॥
लङ्कादहन सोरठो शङ्करात्किल जायते॥
शक्रसंक्रमणी नाम रागिणीतु सुखावहा।

॥ इति सकलसङ्गीतसिद्धा राग संकराः ॥ अथ रागाणां गानकालाः ॥

॥ तुम्बुरु नाटके ॥

श्रीपञ्चमीं समारभ्य यावत्स्याच्छयनं हरेः।
तावद्वसन्त रागस्य गानमुक्तम्मनीषिभिः॥
इन्द्रोत्थानं समारभ्य यावद्दुर्गामहोत्सवम्।
गेया तावद्बुधैर्नित्यं मालश्रो सा मनोहरा॥
प्रातर्गेयस्तु देशाखो ललितः पटमञ्जरी।
विभासो भैरवी चैव कामोदो गराडकर्य्यपि॥
एका वराडी मध्याह्ने सायङ्कार्णाट मालवौ।
नाटश्चैव विशेषेण शेष गेयस्तु सर्वदा॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हिन्दोलश्च वसन्तश्च वसन्ते रक्तिदायकः ।
नाटौ गोडो वराडी च गुर्ज्जरी देशिरेवच ॥
पूर्वाह्णेगानमेतेषां निषिद्धमिति तद्विदः ।
नैवापराह्णे गातव्यौ भैरवी ललितौ क्वचित् ॥
रंगभूमौ नृपाज्ञायां कालदोषो न विद्यते ।
शुद्ध शालग संकीर्ण धातुमातु विभेदतः ॥
देशभाषा विभेदाच्च रागसंख्या न विद्यते ।
न रागाणां नतालानामन्तः क्वापि विद्यते ॥
यथाकाले समारब्धं गीतम्भवति रञ्जकम् ।
अतः स्वरस्य नियमाद्रागेऽपि नियमः कृतः ॥

॥ अर्वाचीनास्तु ॥

ब्राह्ममेमुहूर्त्ते गातव्यो भैरवो राग सत्तमः ।
अरुणोदयवेलायां गेया रामकरी पुनः ॥
प्रातर्वेलावली गेया पूर्वाह्णे सुभगोऽपिच ।
पूर्वाह्णे याति गायेत टोडीमतिमनोरमा ॥
संगरादौ वराडी च गेया गायकनायकैः ।
दिवा तृतीयप्रहरे गातव्यासावरी जनैः ॥
काफी मध्याह्न मध्येतु शारंगोऽपि च गीयते ।
अपराह्णे नटोगेयस्तद्वद्गायेत मालवम् ॥
अपराह्णावसाने च सायाह्ने सति यातिवा ।
सायंकालस्तु कालोवै गौरी रागस्य भूतले ॥
निशामुखे तु कल्याणः केदारस्तु महानिशि ।
तृतीय प्रहरे रात्रावडानोऽपि च गीयते ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

द्वितीयप्रहरे रात्रौ कार्णाटः सर्वसम्मतः ।
अपराह्णेऽपि सौराष्ट्रम्प्रभाते संगरेऽपि च ॥
पञ्चमो मेघसञ्चारे मल्लारः परिगीयते ।

स्वस्वोत्पत्ति निदानसंस्थिति महा मुख्यैक रागोचितः
कालः सज्जनगीतिगोष्ठिषु चिदानन्दायरागव्रजे ।
× + × + × × + × × + + × + ×
+ + × × + × + + + + × + + + ॥

अथैतेषामुत्पत्ति साधनीभूत गीत प्रतिपादिताः । कुत्र के नायकाः, कुत्र का नायिका इति बुभुत्सावतामतिसुकुमारमतीनामीश्वराणां झटितितज्ज्ञानार्थं ते ताश्च लिख्यन्ते ॥ तत्र दामोदरः ।

शृङ्गारेषु भवन्त्येते चतुर्द्धा नायकाः पुनः ।
अनुकूलः शठोधृष्टो दक्षिणश्चेति संज्ञया ॥
एकस्यामेव रमते सदात्त्यक्तपराङ्गनः ।
सीतायां रामवत्सोऽयमनुकूलः स्मृतो यथा ॥
तनोति पुरतः प्रीतिम्पश्चाचरति विप्रियम् ।
कृतदोषोऽपि निःशङ्को शठः स परिकीर्त्तितः ॥
असत्यभाषी दुश्चेष्टस्तर्ज्जितोऽपि न सीदति ।
व्यक्तापराधचेष्टो यः सधृष्ट इति कीर्त्तितः ॥
सद्भावं गौरवम्प्रेम भयम्प्रथमयोषिति ।
अन्यत्रासक्त चित्तोऽपि न मुञ्चति स दक्षिणः ॥

॥ अथ नायिकाः ॥

मुग्धामध्याप्रगल्भा च नायिकात्रिविधा मताः ।
किञ्चित्प्रोद्भूत तारुण्या मुग्धावामारतौ भवेत् ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तत्र मुग्धात्वसम्पूर्णा वयसा कौशलेन या ।
वयः कौशलसम्पूर्णा प्रगल्भा परिकीर्त्तिता ॥
चतुर्दशसमा यावद्बालेति परिगीयते ।
ततस्तु विंशतिं यावन्मुग्धा प्रथमयौवना ॥
ततः षड्विंशतिं यावन्मध्या प्रोक्ता द्वियौवना ।
स्यात् पञ्चविंशतिं यावत्प्रगल्भा तु त्रियौवना ॥
चतुर्थयौवना केचिदत ऊर्द्धं वदन्ति च ।
पञ्चचत्वारिंशदब्दं यावद्वृद्धा ततो मता ॥

॥ तत्र मुग्धा पञ्चधा ॥ प्रथमावतीर्ण यौवना, प्रथम मदनावकारा, रतिरामा, मृदुरामा, समधिकलज्जावती चेति ॥

या न तथा द्रुतगमना दरहसितानि च रसोदये धत्ते ।
सेयं मुकुलकुचश्रीः प्रथमावतीर्णयौवन पदवाच्या ॥
आली सुरतकथादौ यदूधृदिसहसा विकारसम्मोदौ ।
सुरभिदितरलितहारा सा स्यात्प्रथममदनविकारा ॥
सन्तोषयति या कान्तमतीव रमणोत्सवे ।
स्निग्धा तदुपरोधेन रतिरामेति सा मता ॥
अल्पेन रमणेनापि या स्यादामर्द्दिता क्षणात् ।
मालती भ्रमरेणेव मृदुरामेति सा मता ॥
वासः कर्षति कान्ते कृतवाहु सुस्तिकास्तनोपान्ते ।
नमयति वदनमधो या समधिकलज्जावती सेयम् ॥

॥ मध्यापि चतुर्विधा ॥ विचित्रसुरता, प्ररूढस्मरयौवना, ईषत्प्रगल्भवचना, समधिकलज्जावती चेति ॥

शृंगाररससंसिक्तकान्तानानाकलान्विता ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नानाबन्धविधानज्ञा विचित्रसुरता मता ॥
निधायहृदि या कान्तं बाहुभ्यां गाढ़यन्त्रितम् ।
रमेत जघनान्दोलैः प्ररूढस्मरयौवना ॥

कान्ते कुचाञ्चलचलत्करपल्लवान्ते
किञ्चित्तिरोञ्चितमुखी करमुत्क्षिपन्ती ।
माभङ्गकंस्पृश विटेति चलेतिकोपात्
ईषत्प्रगल्भवचना वदन व्यनक्ति ॥
नीवीबन्धोच्छ्वासनेच्छोरतीच्छो-
र्दीपेतल्पान्तेऽथ सख्यासमीपे ॥
मन्दस्मन्दम्पाणिमध्या रुणद्धि
या सा मध्या मध्यम व्रीडितेयम् ।

प्रगल्भा सप्तधा ॥ स्मरान्धा, गाढतारुण्या, समस्तरतकोविदा, भावोन्नता, ईषद्व्रीड़ा, प्रचण्डा, आक्रान्तनायका चेति ॥

स्मारोद्वेगम्वहन्ती स्तनक(नक)गिरि प्रान्तमुन्मीलयन्ती
वक्षोविस्फारयन्ती घनजघनतटद्वन्दमुद्धाटयन्ती ।
नेत्रान्तम्पातयन्ती दिशिदिशिरभसा मोदमत्तावहन्ती
कृष्णां सान्वेषयन्ती व्रजतिपथिमदान्धा स्मरान्धाभ्रमन्ती
दृढश्रृङ्गारतो यस्या भवेदिच्छानिरन्तरम् ॥
नारतिर्गाढतारुण्या सेयम्भोग्या मधुद्विषः ।
समस्तव्यस्तबाह्येषु रतेष्वपि विचक्षणा ॥
कान्ताप्राणहरासेयं समस्तरसकोविदा ।
उत्साहदोषदवहास विषादलज्जा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चापल्यमोह रमणोत्सुकता विलासैः ॥
भावैःपरैरपि तथा तरुणस्य चेतो
भावोन्नता हरति केलिकला विदग्धा ।
कान्तस्यवासः क्षिपति किन्तुनारोहति स्वयम् ॥
विरत्यधरमुल्लासादीषद्व्रीडेयमीरिता ।
अन्यनारीकृतंचिह्नं दृष्ट्वाकान्ततनौरुषा ॥
बन्धनादि तिरस्कारं प्रचण्डाकुरुते परम् ।
धनुर्वल्ली समंकान्तं कृत्वादष्टनिजाधरा ।
विपरीतरतिन्धत्ते रागादाक्रान्तनायिका ॥

॥ एताभिस्सर्वाभिर्मिलित्वा षोडशनायिका भवन्तीति ॥ १६ ॥ एताएव षोडशनायिकाः प्रत्येकं खण्डिताद्यष्टप्रकारभेदेनाष्टाविंशत्यधिक शतसंख्यया लिखिता भवन्ति ॥ १२८ ॥

॥ तथाच ॥

खण्डिता विप्रलब्धा च वासकसज्जाभिसारिका ।
कलहान्तरिताचैव तथैवोत्कण्ठिता परा ॥
स्वाधीनभर्तृकाचान्या तथा चोषितभर्तृका ।
सम्भोगे विप्रलम्भे च इत्यष्टौ नायिका मताः ॥

तत्र, उन्निद्रताजनित राग विलोहिताक्षः
कान्तानखक्षतविशेष विचिह्निताङ्गः
यस्याः कुतोऽपि पतिरेति गृहम्प्रभाते
सा नायिका निगदिता खलु खण्डितेति ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अहरहमतिदूरा दूतिकाम्प्रेष्य पूर्वम्
सरभसमतियाता कापि संकेतदेशे ॥
न मिलति खलु यस्या वल्लभोदैवयोगात्
कथयति भरतस्तां नायिकां विप्रलब्धाम् ।
या वासवेश्मनि स्वकल्पित तल्पमध्ये
ताम्बूलपुष्पवसनैश्च समं सुसज्जा ॥
कान्तस्यसङ्गसमयं समवेक्ष्यमाणा
सा कथ्यते कविवरैरिह वाससज्जा ।
उद्दामसन्मथमहाज्वरवेपमाना
रोमाञ्चकराटकितमङ्गतलम्वहन्ती ।
निःशङ्किनी व्रजति या प्रियसंगमोत्का
सा कामिनी किल भवेदभिसारिकेति ॥
चाटुकारमपि जीवितनाथं
कोपतःस्मरतिरी(?)र्ष्यमतिर्य्या ।
तप्यतेऽनुशय मन्मथभावैः
कथ्यते तु कलहान्तरिता सा ॥
नैवागत स्समुचितेष्वपि वासरेषु
प्राणेश्वरोऽति गुरुकार्य्य वशेन यस्याः ॥
दुर्वारमन्मथमहाज्वर रेपिताङ्गी-
मुत्कण्ठितास्वदतितास्भरतः कवीन्द्रः ॥
आश्लेषचु म्बनशतैः कुसुमादि दानैः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रेमोत्तर प्रणयकोमलचाटुवाग्भिः ।
संस्तूयते प्रियतमेन च यानुरागात्
स्वाधीनभर्तृकपदप्रकटी कृता सा ॥
चिन्ताकुलास्मलिन मंशुकमावहन्तीं
डिण्डीरपिण्डपरिपाण्डुर गण्डभित्तिम् ।
निर्भूषणां प्रियवियोगज दुःखतसां
तां प्रोषितप्रियतमास्प्रवदन्ति सन्तः ॥

अत्रापि स्वकीया परकीयासामान्यवनिता चेति,
प्रत्येकमेतासाम्भेदेन ता अष्टाविंशत्यधिक शतनायिका,
इदानीश्चतुरधिकशतत्रय नायिका भवन्तीति ॥

तत्र कुलजाङ्गनावेश्या त्रिधास्यादभिसारिका ।
कुलजा संवृता त्रस्ता सव्रीडा तद्गृहम्व्रजेत् ॥
सलीला स्वेषु भावेषु त्रस्ताचिह्नोभितानना ।
मन्दस्खलितसंलापा विभ्रमोत्फुल्ललोचना ।
आविद्धगतिसञ्चारा शनैर्गमनकारिणी ॥
नायकम्परनारी तु व्रजेन्नान्येन वीक्षिता ।
सखीयुक्ता मदाविष्टा स्फारिताक्षीत्वशंकिता ॥
सनूपुरा यथा कामं वेश्या सरतिनायकम् ।
शुक्लपक्षो कृष्णपक्षो द्विधास्यादभिसारिका ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मल्लिकामालधारिण्यः सर्वाङ्गीणार्द्रचन्दनाः ।
क्षौमवत्यो न लक्ष्यन्ते ज्योत्स्नायामभिसारिकाः ॥
कालागुरुविलिप्ताङ्गी नीलरागवदम्बरा ।
चन्द्रोदय परित्रस्ता कृष्णाकृष्णाभिसारिका ॥

इति

श्री लोचनशर्म्म विरचितायां रागतरङ्गिण्यां
रागसंस्थानादि कथनन्नाम पञ्चमस्तरंगः ॥

(समाप्तः)



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

१५८

१३२
२२
१५४
४
१५८

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi